# Shlokas to be Recited during Study of Shrimad Ramayanam

# શ્રીમદ્રામાયણપઠનોપક્રમોપસંહારક્રમઃ સ્માર્ત

## Document Information

Text title : Shlokas to be Recited during Study of Shrimad Ramayanam

File name : rAmAyaNapaThanopakramopasaMhArakramaH.itx

Category : raama, dhyAnam, mangala

Location : doc_raama

Transliterated by : Aruna Narayanan narayanan.aruna at gmail.com

Proofread by : Aruna Narayanan narayanan.aruna at gmail.com

Latest update : February 9, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 9, 2023

*sanskritdocuments.org*

# શ્રીમદ્રામાયણપઠનોપક્રમોપસંહારક્રમઃ સ્માર્ત

॥ શ્રીઃ ॥

## ધ્યાનમઙ્ગલશ્લોકાઃ ।

(Dhyana Shloka to be recited before the commencement of Parayanam)

॥ સ્માર્તસમ્પ્રદાયઃ ॥

શ્રીવિઘ્નેશ્વરધ્યાનમ્ -
શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્ સર્વવિઘ્નોપશાન્તયે ॥ ૧॥

વાગીશાદ્યાઃ સુમનસઃ સર્વાર્થાનામુપક્રમે ।
યં નત્વા કૃતકૃત્યાઃ સ્યુસ્તં નમામિ ગજાનનમ્ ॥ ૨॥

(અનન્તરમ્ શ્રીમચ્છઙ્કરભગવત્પાદગુરુપરમ્પરા અનુસન્ધેયા)
ૐ નારાયણં પદ્મભુવં વસિષ્ઠં શક્તિં ચ તત્પુત્રં પરાશરં ચ
    વ્યાસં શુકં ગૌડપાદં મહાન્તં ગોવિન્દયોગીન્દ્રમથાસ્ય શિષ્યમ્ ।
શ્રી શઙ્કરાચાર્યમથાસ્ય પદ્મપાદં ચ હસ્તામલકં ચ શિષ્યં
    તં તોટકં વાર્ત્તિકકારમન્યાનસ્મદ્ ગુરૂન્ સન્તતમાનતોઽસ્મિ ॥
સદાશિવસમારમ્ભાં શઙ્કરાચાર્યમધ્યમામ્ ।
અસ્મદાચાર્યપર્યન્તાં વન્દે ગુરુપરમ્પરામ્ ॥
– અદ્વૈત ગુરુપરમ્પરા સ્તોત્રમ્ ।

શ્રીસરસ્વતીપ્રાર્થના -
દોર્ભિર્યુક્તા ચતુર્ભિઃ સ્ફટિકમણિમયીમક્ષમાલાં દધાના
    હસ્તેનૈકેન પદ્મમ્ સિતમપિ ચ શુકં પુસ્તકં ચાપરેણ ।
ભાસા કુન્દેન્દુશઙ્ખસ્ફટિકમણિનિભા ભાસમાનાસમાના
    સા મે વાગ્દેવતેયં નિવસતુ વદને સર્વદા સુપ્રસન્ના ॥ ૩॥

શ્રીવાલ્મીકિનમસ્ક્રિયા -
કૂજન્તં રામ રામેતિ મધુરં મધુરાક્ષરમ્ ।
આરુહ્ય કવિતાશાખાં વન્દે વાલ્મીકિકોકિલમ્ ॥ ૪॥

વાલ્મીકેર્મુનિસિંહસ્ય કવિતાવનચારિણઃ ।
શ‍ૃણ્વન્ રામકથાનાદં કો ન યાતિ પરાં ગતિમ્ ॥ ૫॥

યઃ પિબન્ સતતં રામચરિતામૃતસાગરમ્ ।
અતૃપ્તસ્તં મુનિં વન્દે પ્રાચેતસમકલ્મષમ્ ॥ ૬॥

શ્રીહનુમન્નમસ્ક્રિયા -
ગોષ્પદીકૃતવારાશિં મશકીકૃતરાક્ષસમ્ ।
રામાયણમહામાલારત્નં વન્દેઽનિલાત્મજમ્ ॥ ૭॥

અઞ્જનાનન્દનં વીરં જાનકીશોકનાશનમ્ ।
કપીશમક્ષહન્તારં વન્દે લઙ્કાભયઙ્કરમ્ ॥ ૮॥

ઉલ્લઙ્ઘ્ય સિન્ધોઃ સલિલં સલીલં યઃ શોકવહ્નિમ્ જનકાત્મજાયાઃ ।
આદાય તેનૈવ દદાહ લઙ્કાં નમામિ તં પ્રાઞ્જલિરાઞ્જનેયમ્ ॥ ૯॥

આઞ્જનેયમતિપાટલાનનં કાઞ્ચનાદ્રિકમનીયવિગ્રહમ્ ।
પારિજાતતરુમૂલવાસિનં ભાવયામિ પવમાનનન્દનમ્ ॥ ૧૦॥

યત્ર યત્ર રઘુનાથ કીર્તનમ્ તત્ર તત્ર કૃતમસ્તકાઞ્જલિમ્ ।
બાષ્પવારિપરિપૂર્ણલોચનં મારુતિં નમત રાક્ષસાન્તકમ્ ॥ ૧૧॥

મનોજવં મારુતતુલ્યવેગં જિતેન્દ્રિયં બુદ્ધિમતાં વરિષ્ઠમ્ ।
વાતાત્મજમ્ વાનરયૂથમુખ્યં શ્રીરામદૂતં શિરસા નમામિ ॥ ૧૨॥

શ્રીરામાયણપ્રાર્થના -
યઃ કર્ણાઞ્જલિસમ્પુટૈરહરહઃ સમ્યક્ પિબત્યાદરાદ્ -
વાલ્મીકેર્વદનારવિન્દગલિતં રામાયણાખ્યં મધુ ।
જન્મવ્યાધિજરાવિપત્તિમરણૈરત્યન્તસોપદ્રવં
સંસારં સ વિહાય ગચ્છતિ પુમાન્ વિષ્ણોઃ પદં શાશ્વતમ્ ॥ ૧૩॥

તદુપગતસમાસસન્ધિયોગં સમમધુરોપનતાર્થવાક્યબદ્ધમ્ ।
રઘુવરચરિતં મુનિપ્રણીતં દશશિરસશ્ચ વધં નિશામયધ્વમ્ ॥ ૧૪॥

વાલ્મીકિગિરિસમ્ભૂતા રામસાગરગામિની ।

પુનાતુ ભુવનં પુણ્યા રામાયણમહાનદી ॥ ૧૫॥

શ્લોકસારસમાકીર્ણં સર્ગકલ્લોલસઙ્કુલમ્ ।
કાણ્ડગ્રાહમહામીનં વન્દે રામાયણાર્ણવમ્ ॥ ૧૬॥

વેદવેદ્યે પરે પુંસિ જાતે દશરથાત્મજે ।
વેદઃ પ્રાચેતસાદાસીત્ સાક્ષાદ્રામાયણાત્મના ॥ ૧૭॥

શ્રીરામધ્યાનમ્ -
વૈદેહી સહિતં સુરદ્રુમતલે હૈમે મહામણ્ડપે
    મધ્યેપુષ્પકમાસને મણિમયે વીરાસને સુસ્થિતમ્ ।
અગ્રે વાચયતિ પ્રભઞ્જનસુતે તત્ત્વં મુનિભ્યઃ પરં
    વ્યાખ્યાન્તં ભરતાદિભિઃ પરિવૃતં રામં ભજે શ્યામલમ્ ॥ ૧૮॥

વામે ભૂમિસુતા પુરશ્ચ હનુમાન્ પશ્ચાત્ સુમિત્રાસુતઃ
    શત્રુઘ્નો ભરતશ્ચ પાર્શ્વદલયોર્વાય્વાદિકોણેષુ ચ ।
સુગ્રીવશ્ચ વિભીષણશ્ચ યુવરાટ્ તારાસુતો જામ્બવાન્
    મધ્યે નીલસરોજકોમલરુચિં રામં ભજે શ્યામલમ્ ॥ ૧૯॥

નમોઽસ્તુ રામાય સલક્ષ્મણાય દેવ્યૈ ચ તસ્યૈ જનકાત્મજાયૈ ।
નમોઽસ્તુ રુદ્રેન્દ્રયમાનિલેભ્યો નમોઽસ્તુ ચન્દ્રાર્કમરુદ્ગણેભ્યઃ ॥ ૨૦॥

## શ્રીમદ્રામાયણપારાયણસમાપનક્રમઃ ।

(Mangala shloka to be recited at the end)
સ્વસ્તિ પ્રજાભ્યઃ પરિપાલયન્તાં ન્યાય્યેન માર્ગેણ મહીં મહીશાઃ ।
ગોબ્રાહ્મણેભ્યઃ શુભમસ્તુ નિત્યં લોકાઃ સમસ્તાઃ સુખિનો ભવન્તુ ॥ ૧॥

કાલે વર્ષતુ પર્જન્યઃ પૃથ્વી સસ્યશાલિની ।
દેશોઽયં ક્ષોભરહિતો બ્રાહ્મણાઃ સન્તુ નિર્ભયાઃ ॥ ૨॥

અપુત્રાઃ પુત્રિણઃ સન્તુ પુત્રિણઃ સન્તુ પૌત્રિણઃ ।
અધનાઃ સધનાઃ સન્તુ જીવન્તુ શરદાં શતમ્ ॥ ૩॥

ચરિતં રઘુનાથસ્ય શતકોટિપ્રવિસ્તરમ્ ।
એકૈકમક્ષરં પ્રોક્તં મહાપાતકનાશનમ્ ॥ ૪॥

શ઼ૃણ્વન્ રામાયણં ભક્ત્યા યઃ પાદં પદમેવ વા ।

સ યાતિ બ્રહ્મણઃ સ્થાનં બ્રહ્મણા પૂજ્યતે સદા ॥ ૫॥

રામાય રામભદ્રાય રામચન્દ્રાય વેધસે ।
રઘુનાથાય નાથાય સીતાયાઃ પતયે નમઃ ॥ ૬॥

યન્મઙ્ગલં સહસ્રાક્ષે સર્વદેવનમસ્કૃતે ।
વૃત્રનાશે સમભવત્તત્તે ભવતુ મઙ્ગલમ્ ॥ ૭॥

યન્મઙ્ગલં સુપર્ણસ્ય વિનતાકલ્પયત્ પુરા ।
અમૃતં પ્રાર્થયાનસ્ય તત્તે ભવતુ મઙ્ગલમ્ ॥ ૮॥

અમૃતોત્પાદને દૈત્યાન્ ઘ્નતો વજ્રધરસ્ય યત્ ।
અદિતિર્મઙ્ગલં પ્રાદાત્તત્તે ભવતુ મઙ્ગલમ્ ॥ ૯॥

ત્રીન્ વિક્રમાન્ પ્રક્રમતો વિષ્ણોરમિતતેજસઃ ।
યદાસીન્મઙ્ગલં રામ તત્તે ભવતુ મઙ્ગલમ્ ॥ ૧૦॥

ઋતવઃ સાગરા દ્વીપા વેદા લોકા દિશશ્ચ તે ।
મઙ્ગલાનિ મહાબાહો દિશન્તુ તવ સર્વદા ॥ ૧૧॥

કાયેન વાચા મનસેન્દ્રિયૈર્વા બુદ્ધ્યાત્મના વા પ્રકૃતેઃ સ્વભાવાત્ ।
કરોમિ યદ્યત્ સકલં પરસ્મૈ નારાયણાયેતિ સમર્પયામિ ॥ ૧૨॥

ઇતિ શ્રીમદ્રામાયણપઠનોપક્રમોપસંહારક્રમઃ સમાપ્તઃ ।

Encoded and proofread by Aruna Narayanan narayanan.aruna at gmail.com

*Shlokas to be Recited during Study of Shrimad Ramayanam*
pdf was typeset on February 9, 2023

Please send corrections to *sanskrit@cheerful.com*